N.A.
Suta samhitā with tika
सूत संहिता टीका सहित
Sanskrit (Devnagari)
N.A. (Very old)
Paper — Handwritten
22 Folio
14" x 5.5"
Complete

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सूत संहिता

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्तं०हिं० श्रीगणेशायनमः॥ ज्ञातव्यंवस्तुप्रथमखण्डेनोपायंवक्तुंद्वितीयखण्डःप्रारभ्यते॥ कैलासेत्वारभ्य
१

ॐकैलासशिखरेरम्येनानारत्नसमाकुले॥ नानापुष्पसमाकीर्णेनानामूलफलोदके॥१
नानावल्लीसमाकीर्णेनानामृगसमाकुले॥ नानावृक्षसमाकीर्णेनानायोगिसमावृते
२॥ नानासिद्धसमाकीर्णेनानामुनिसमावृते॥ नानादेवसमाकीर्णेनानाचारणसेविते
३॥ नानापक्षिसमाकीर्णेनानागंधर्वसेविते॥ सुखासीनंसुप्रसन्नंसुनेत्रंसुस्मितंशुचिम्
४॥ स्वतेजसाजगत्सर्वंभासयन्तंभयापहम्॥ सर्वशास्त्रार्थतत्वज्ञंवेदवेदांगपारगम्॥५॥

मुनयऊचुरित्येतदंतंव्यासवाक्यम्॥ संक्षेपविस्तराभ्यांउपदिष्टस्यापितत्वस्यानादिभवपरंपरोपा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

त्तदुरितोपहतचित्तैर्दुरधिगमत्वात्॥ दुरितप्रक्षयद्वारा एतेषामपि तदधिगमे क उपाय

भस्मोद्धूलितसर्वाङ्गं त्रिपुण्ड्राङ्कितमस्तकम्॥ रुद्राक्षमालाभरणं जटामण्डल
मण्डितम्॥६॥ जितेन्द्रियं जितक्रोधं जीवन्मुक्तं जगद्गुरुम्॥ व्यासप्रसादसम्प
न्नं व्यासवद्धृगतस्पृहम्॥७॥ वेदमार्गसदानिष्ठं वेदमार्गप्रवर्तकम्॥ ऋज्वक
यशिरोग्रीवं नासाग्रन्यस्तलोचनम्॥८॥ स्वयं स्वमेव ध्यायन्तं सूतं बुद्धिमतां व
रम्॥ विष्णुवृद्धो विशालाक्षो वत्सः कुण्डिनः प्रारुणिः॥९॥ जाबालो जमदग्नि
श्च जर्जरो जङ्गमो जयः॥ पक्कः पाशधरः पारः पारगः पण्डितोत्तमः॥१०॥ महा
कायो महाग्रीवो महाबाहुर्महोदरः॥ उद्दालको महासेनः प्रार्त्तः आमलकप्रियः॥११

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सू०हि० इति मुनयो जिज्ञासंते ॥ भ वता कथितमिति ॥१॥२॥३॥४॥५॥६॥७॥८॥९॥१०॥

२

एकपादो द्विपादश्च त्रिपादः पञ्चनायकः ॥ उग्रवीर्यो महावीर्यो उत्तमो नुत्तमः पटुः ॥ १२
पण्डितः करुणः कालः कैवल्यश्च कलाधरः ॥ कल्पान्तः कंकणः करवः कालः काला
ग्निरुद्रकः ॥१३॥ श्वेतवाहुर्महाप्राज्ञः श्वेताश्वतरसंज्ञकः ॥ एषां शिष्याः प्रशिष्याश्च
पाशविच्छेदनेरतः ॥१४॥ विचार्यमाणा वेदार्थे निश्चयं विवशा भृशम् ॥ समागम्य
समाधिस्थं दण्डवत्प्रणिपत्य च ॥१५॥ स्तोत्रैः स्तुत्वा महात्मानं पप्रच्छुः पण्डितोत्तमाः ॥
मुनय ऊचुः ॥ भवता कथितं सर्वं संक्षेपाद्विस्तरेण च ॥१६॥ इदानीं श्रोतुमिच्छामो ज्ञा
नयोगं सहेतुकम् ॥ साक्षाद्विभो जगन्नाथात्कृष्णद्वैपायनाङ्कुरेः ॥१७॥

११॥ १२॥ १३॥ १४॥ १५॥ १६॥ १७॥ १८॥ १९॥ २०॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

योग उपायः सोपायं ज्ञानसाधनं शुश्रूषामहे त्वत्तः ॥ गिरां नाथो बृहस्पतिः सकललोकहितायावश्य

अप्राप्तज्ञानयोगस्त्वं न वेत्ता त्वाम्हते भुवि ॥ तस्मात्कारुण्यतोस्माकं संक्षेपाद्वक्तुमर्हसि ॥
१८॥ इति पृष्टो मुनिश्रेष्ठैः सूतः पौराणिकः प्रभुः ॥ साक्षात्सर्वेश्वरं साम्बं संसारामयभेष
जम् ॥१९॥ सर्वज्ञं सर्वगं सर्वं सर्वभूतहितेरतम् ॥ व्याघ्रचर्माम्बरधरं व्याख्यानैकरतं विभुम्
२०॥ चतुर्भुजं शरच्चन्द्रचन्द्रिकाधवलाकृतिम् ॥ गंगाधरं विरूपाक्षं चन्द्रमौलिं जटाधरम् ॥२१
नीलग्रीवं चिरं स्मृत्वा व्याससम्यमिततेजसम् ॥ प्रहृष्टः परया भक्त्या परिपूर्णमनोरथः ॥२२॥
लौकिकैर्वैदिकैः स्तोत्रैः स्तुत्वा सम्यक् समाहितः ॥ वक्तुमारभते सर्वं पुराणपत्यमहेश्वरम् ॥२३

प्रष्टव्यमर्थं बृहस्पति पृच्छति ॥२१॥ २२॥ २३॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सू०हिं० आलोकयेति देव्यालोकनाभिप्रायः॥२४॥ वक्ष्यमाणोपाये समाश्वासजननाय शिवादिवक्तृ
२
सूत उवाच॥ शृणुध्वं मुनयः सर्वे भाग्यवन्तः समाहिताः॥ एतद्देवपुरा पृष्टं द्विजरं नाथो महेश्व
रम्॥२४॥ देवोपि देवीमालोक्य करुणाविष्टचेतसा॥ प्राह गंभीरया वाचा गुरवे मुनिपुङ्गवाः॥
२५॥ देव्यांकेसमासीनः स्कंदोपि श्रुतवांस्तदा॥ स्कंदाद्वसिष्ठः संप्राप्तः पूर्वजन्मतपोब
लात्॥२६॥ वसिष्ठाल्लब्धवान् शक्तिः शक्तेः प्राप्तः पराशरः॥ पराशरान्मुनिश्रेष्ठाद्भ
गवान्व्याससंज्ञितः॥२७॥ तदहं श्रुतवान्व्यासाज्जन्मांतरतपोबलात्॥ वक्ष्ये वेदवि
दामद्य युष्माकं तद्यथाश्रुतम्॥२८॥ इति सूतसंहितायां ज्ञानयोग
परंपरोपन्यासः॥२६॥२७॥२८॥ इति श्रीसूतसंहितायां ज्ञानयोगखंडे प्रश्नविधिः प्रथमोध्या·
यः॥१

सोपायेज्ञानयोगेश्रद्धावतएवाधिकारोनेतरस्य॥उक्तंहि॥अश्रद्धयाहुतंदत्तंतपस्तप्तंकृतं
चयत्॥असदित्युच्यतेपार्थनचतत्प्रेत्यनोइहेति॥अतस्तत्रज्ञानेश्रद्धातिशयजननायस्व
रूपतःफलतश्चतस्यनिरतिशयमुत्कर्षमाह॥अवाच्यमित्यादिभिः॥अशेषक्लेशनिवर्ह
णत्वेननिरतिशयानंदप्रापकत्वेनचात्यन्तमुत्तमत्वादतिगुह्यमितिरहस्यमिदंज्ञानंय
त्तत्रानधिकारिणिनवक्तव्यम्॥नविद्यामूषरेवपेदित्यर्थः॥तत्रचज्ञानेत्रिविधाअधि
कारिणः विशुद्धसत्त्वाः समाहितचेतस उत्तमास्तेषांवेदान्तश्रवणमात्रमेवोपायस्तदा
ह॥आम्नायानेकसंसिद्धमिति॥वक्ष्यतिचसप्तमाध्यायावसानेसर्वदासर्वमुत्सृ
ज्यवेदान्तश्रवणंकुर्विति॥येतुविवेकवैराग्यसम्पन्नाअपिरजोलेशानुवृत्त्याविक्षिप्तचे
तसोमध्यमाधिकारिणःसहसैवचेतसएकाग्रत्वंनलभंतेतेषामष्टाङ्गयोगोज्ञानसाध

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सू॰ हि॰ नम्॥ तत्र दशमाध्यायमारभ्य खण्डशेषेण वक्ष्यति ये तु प्रबलतरदुरितप्रतिबद्धचित्ता अत्यन्तकामा
४ त्वेन प्रवृत्ता अप्रवृत्तिविहितजिज्ञासा अधर्माधिकारिणः तेषां जिज्ञासाप्रवृत्तिपर्यवसानं अधर्मधर्माणां

ईश्वर उवाच॥ अवाच्यमेतद्विज्ञानमतिगुह्यमनुत्तमम्॥ आम्नायानेकसंसिद्धम
शेषक्लेशनाशनम्॥१॥ अनन्तानन्दमोक्षाख्यवृत्तप्राप्त्येकसाधनम्॥ आश्र
मैरखिलैर्युक्तमवाङ्कैरपि संयुतम्॥२॥

कथंचिदतिक्रमे तन्निमित्तं पापं तस्य प्रायश्चित्तं तेन विशुद्धानां दानं धर्मादिकं चोपायः विविदिष
न्ति यज्ञेनेत्यादिश्रुतेः॥ स चायमुपायो दशमादर्वाचीनेनाध्यायजातेनोपदिश्यते॥ इति स
कलोऽयं खण्डो ज्ञानोपायप्रतिपादकः॥२॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तत्रैतस्मिन्नध्याये वर्णोक्रममधर्मो रणं हिरण्यगर्भेणास्त्रष्टिं वक्तुं महदादिक्रमेण हिरण्यगर्भो
त्पत्तिमाह ॥ आसीदिदमित्यादि ॥ ३ ॥ एवञ्च सर्गक्रमो गतखण्डेऽस्मादिष्वध्यायेषु प्रपञ्चि

वसेकार्णवतः साक्षाच्छ्रीगुरुवाच स्यातेऽधुना ॥ आसीदिदं तमोमात्रमात्माभिन्नं जगत्सुरा ॥
३ ॥ ततः सत्त्वगुणक्षोभान्महत्तत्त्वमजायत ॥ एक एव शिवः साक्षान्नित्यो मूर्त्तो दधत्सुनः ॥ ४
रजोगुणं समास्थाय ब्रह्मास्यात्सृष्टिकारणम् ॥ सत्त्वमास्थाय विष्णुः स्यात् पालनार्थे बृ
हस्पते ॥ ५ ॥ तमसा कालरुद्राख्यः सर्वसंहारकारणम् ॥ असंख्या मूर्त्तयस्तेषां विज्ञायन्ते पृ
थक् पृथक् ॥ ६ ॥ उत्तमाधमरूपेण गुणवैषम्यमात्रतः ॥ शब्दादीनि च भूतानि श्रोत्रादीन्द्रि
यपञ्चकम् ॥ ७ ॥
तदित्तिनेह पुनरुच्यते ॥ तच्चानुसूतेन मुनिभ्यः स्ववचनेनैवोक्तः इह तु शिवेन बृहस्पतये उपदिष्टप्रकार

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सू०हि० वर्णानमेवेत्येतावानेव विशेषः हिरण्यगर्भ इति॥ यथोक्तसूक्ष्मभूतेन्द्रियकरणोपाधिको हिरण्यगर्भः
९ पञ्चीकृतभूतमयशरीरप्रजापतिरूपेण प्रादुरासीदित्यर्थः॥ प्रथमः शरीरीति स्थूलभूतमयशरीरसंबंध

वागादिपञ्चकं तद्वत्प्राणापानादिपञ्चकम्॥ मनो बुद्धिरहंकारश्चित्तं चेति चतुष्टयम्॥८॥
अव्यक्तात्कालपाकेन प्रजायन्ते पृथक्पृथक्॥ सर्वे कालपराधीना न कालः कस्यचि
द्वशे॥९॥ कालो मायात्मसंबंधात्सर्वसाधारणात्मकः॥ हिरण्यगर्भो भगवान्प्रादुरा
सीत्प्रजापतिः॥१०॥ स वै शरीरी प्रथमः स वै पुरुष उच्यते॥ तेन ब्रह्माण्डमुत्पन्नं तन्म
ध्येयं बृहस्पते॥११॥ भुवनानि च देवाश्च शतशोथ सहस्रशः॥ स्थावरं जङ्गमं चैव तथा
वर्णाश्रमादि च॥१२॥

एतस्यैव यतः प्रथम इत्यर्थः॥ प्रजापतिपदप्रापकेण तपसा सर्वाणि पापानि पूर्वं मोषतीति पुरुषः श्रू
यते हि॥ स यत्पूर्वोस्मात्सर्वस्मात्सर्वान्पाप्मन औषत्तस्मात्पुरुष इति॥१३

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

एवं वर्णाश्रमाचाराणामनुत्पत्तिमभिधाय तदाचरणोपयोगमाह ॥ १४ ॥ वर्णाश्रमाचारवतेति ॥ १५ ॥

साम्बं सर्वेश्वरं ध्यात्वा प्रसादस्य निर्ममे ॥ प्रसादेन विना देवाः प्रसादेन विना नराः ॥ १३ ॥ प्रसा
देन विना लोका न सिध्यन्ति महामुने ॥ प्रसादाद्देवदेवस्य ब्रह्मा ब्रह्मत्वमागतः ॥ १४ ॥ विष्णु
र्विष्णुपदं प्राप्तो रुद्रो रुद्रत्वमागतः ॥ वर्णाश्रमाचारवता पुरुषेण महेश्वरः ॥ १५ ॥ आ
राध्यते प्रसादार्थं न दुष्टैस्तैः कदाचन ॥ यस्मिन्प्रसन्ने सर्वेषां प्रवृत्तिर्जायते पुष्कला ॥ १६
ग्रहो तेन विना लोकश्चेष्टते न्यत्र मायया ॥ ब्रह्मचर्याश्रमस्थानां यतीनां च विशेषतः ॥ १७
वानप्रस्थाश्रमस्थानां गृहस्थानां वशे हरः ॥ वर्णाश्रमसमाचारात्प्रसन्ने परमेश्वरे ॥ १८ ॥

चतुर्णामाश्रमाणां शिवप्रसादद्वारा ज्ञानोपयोगमाह ॥ ब्रह्मचर्याश्रमेति ॥ १६ ॥ १७ ॥ १८ ॥ १९ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सू०हि० सर्वं संक्षेपत इति ॥२०॥ अयमुपायो नुष्ठेय इति ॥ संक्षेपेणोक्तमित्यर्थः ॥ अनुष्ठानप्रकारस्तु प्रवं
६ चेन वक्ष्यते वर्णाश्रमरत इति तत्प्रयुक्तधर्मेष्वित्यर्थः ॥ तत्र वर्णधर्माः ब्राह्मणो बृहस्पतिसवेन राजा राज
सूयेन यजेत वैश्यो वैश्यस्तोमेनेत्यादयः आश्रमधर्माः अहूतश्चाध्यधीयीतेत्यादि ब्रह्मचारी

साक्षात्तद्विषयं ज्ञानमचिरादेव जायते ॥ ज्ञानादज्ञानविध्वस्तिर्नेकर्मभ्यः कदाचन ॥
१९ ॥ अज्ञाने सति संसारो ज्ञाने सकलमुच्यते ॥ तस्मादज्ञानेन मुक्तिः स्यादज्ञानस्यक्ष
यान्मुने ॥२०॥ सर्वं संक्षेपतः प्रोक्तं मया वेदविदाम्बर ॥ तस्मात्त्वं च महाभाग वर्णाश्र
मरतो भव ॥२१॥ सूत उवाच ॥ इति श्रुत्वा मुनिश्रेष्ठा ब्रह्मणस्परमेश्वरम् ॥ सनत्कुमारभक्तो विप्राः
प्रसादार्थं त्रिशूलिनः ॥२२॥
धर्मः होमे वसानो जायायती अग्निमादधीयतामित्यादयो गृहस्थधर्माः अरण्यवासादयो वनस्थध
र्माः श्रवणादयो यतिधर्मा इति ॥२२॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वर्णाश्रमे धर्मारागमुत्पत्तिसंग्रहेराखस्त्रपंचश्रुतवानपि बृहस्पतिस्तत्सूपसन्नशुश्रूषयादेवंतुष्टाव॥
नमोहरायदेवायेत्यादिना॥२३॥नमोमौंजायेति॥२४॥मुंजाज्यमन्नंउग्रैर्वै मुंजाइतिश्रुतेः॥ तत्र भोग्य

बृहस्पतिरुवाच॥नमोहरायदेवायत्रिनेत्रायत्रिशूलिने॥तापसायमहेशायतत्त्वज्ञा
नप्रदायिने॥२३॥नमोमौंजायशुभ्रायनमःकारहरायमूर्त्तये॥नमोदेवादिदेवायन
मोवेदान्तवेदिने॥२४॥नमःपरायरुद्रायसुपारायनमोनमः॥विश्वमूर्त्तेमहेशायवि
श्वाधारायतेनमः॥२५॥
मिति तत्संबंधी भोगप्रद ईश्वरस्तस्मैमुंजपदेनमुंजवान् वाहिमवतः शिखरप्रदेश उपलक्ष्यते
सोस्यनिवासइतिमौंजस्तस्मैपरोमौंजवतोनीहीति श्रुतिः॥२५॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सू०हिं० कालायभाविभवद्भूतमयंकल्पयति जगदेषकालोऽनस्तदात्मने कालकालायनमपिकलय
७ ते तस्यापिपरिच्छेदकायकालातीताय स्वयंकेनचिदप्यपरिछिन्नाय॥ योगानंदायेति॥ योगः

नमोभक्तभवच्छेदकारणायामलात्मने॥ कालायकालकालायकालातीतायतेनमः
२६॥ जितेन्द्रियायनित्यायजितक्रोधायतेनमः॥ नमःपाषण्डभङ्गायनमःपापह
रायते॥२७॥ नमःपर्वतराजेन्द्रकन्यकापतयेनमः॥ योगानंदाययोगाययोगिनांपत
येनमः॥२८॥

समाधिः॥ युजसमाधाविति धातुः॥ तत्राभिव्यज्यमानोयआनंदस्तद्रूपाययोगायसमाधिरूपा
य॥ योगिनांपतयइति॥ समाधिनिष्ठानांसमाधिफलप्रदानेनपालकायनमइत्यर्थः॥२८॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्राणायामेति॥ श्वासप्रश्वासयोर्गतिविच्छेदः॥ प्राणायामस्तदभ्यासपराणां ते हि पदाकण्ठादिस्थानेषु ल
कारादिमूलवर्णैः सह प्राणनियमनमभ्यसन्ति तदा ते कालं वंचयंति॥ उक्तं हि॥ कण्ठे भ्रूमध्ये हृदि ना
भौ सर्वांगे स्मरेत क्रमशः लवरसमीरणसवर्णैरनिलत्वमाकालवंचनेयं स्यादिति॥ अतस्तेषां वं
चितकालानां या प्राणरक्षा भवति सापि त्वत्प्रसादलभ्येत्यर्थः॥ मूलाधार इति परा हि शक्तिर्मूलाधा

प्राणायामपराणां तु प्राणरक्षाय ते नमः॥ मूलाधारे प्रविष्टा[illegible]य मूलदीपाय ते नमः॥२८

रादामस्तकमुद्गता तत्र चन्द्रस्पर्शात् स्रवदमृतधारया सह स्वयमपि पुनर्मूलाधारं प्रविशति॥ य
दाहुः॥ मूलालवालकुहरादुदिता भवानी निर्भिद्य षट्सरसिजानि तडिल्लतेव॥ भूयोपि तत्र विशति
ध्रुवमण्डलेन्दुनिष्यंदमानसुखबोधसुधास्वरूपेति॥ तस्याः शक्तेः शक्तिमान् शिवोप्यभिन्न इति हि
निरूपितं अतः सोपि मूलाधारे प्रविष्ट इत्यर्थः॥ मूलदीपायेति॥ सोमसूर्याग्नयो हि संवेदीपास्ते हि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सू॰टि॰ चित्प्रकाशेन प्रतिभातमेवार्थं दीपयितुं शक्नुवन्ति नान्यथा श्रूयते हि न तत्र सूर्यो भाति न चन्द्रतारकं
८ नेमा विद्युतो भान्ति कुतोऽयमग्निः तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाती
ति॥ अतश्चित्प्रकाशो मूलदीपस्तस्मा आत्मने॥२९॥ नाभिकंद इति॥ तत्र तयोरपि स्थानयोर

नाभिकन्दे प्रविष्टाय नमो हृद्देशवर्तिने॥ सच्चिदानन्दपूर्णाय नमः साक्षात्परात्म प
ने॥३०॥ नमः शिवायाद्भुतविग्रहाय ते नमः शिवायाद्भुतविक्रमाय ते॥ नमः शिवाया
खिलनायकाय ते नमः शिवायामृतहेतवे नमः॥३१॥

भिव्यक्तिहेतुत्वात्॥३०॥ अमृतहेतव इति॥ अमृतं पुण्यफलं स्वर्गादि विद्याफलं चापव
र्गं तदुभयहेतवे तथा त्वं च जगत्खण्डे तृतीयाऽध्याये वर्णितम्॥३१॥ ३२॥ ३३॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पठंत्विति॥ पुरुषव्यत्ययः॥ ३४॥ संहिताख्यस्य सूतस्य व्याख्यां तात्पर्यदीपिकां सुस्थितांम

सूतउवाच॥ यइदं पठते नित्यं स्तोत्रं भक्त्या सुसंयतः॥ तस्य मुक्तिः करस्थास्या
च्छंकरप्रियकारणात्॥ ३२॥ विद्यार्थी लभते विद्यां विवाहार्थी गृही भवेत्॥ वै
राग्यकामो लभते वैराग्यं भवनारकम्॥ ३३॥ तस्माद्दिने दिने गुह्यमिदं स्तोत्रं स
माहितः॥ पठन्तु भवनाशार्थमिदं हि भवनाशनम्॥ ३४॥ इति श्रीसूतसंहिता
यां ज्ञानयोगखण्डे द्वितीयोऽध्यायः॥ २॥

नुग्रहात्तु विद्यातीर्थमहेश्वरः॥ इति श्रीसूतसंहितायां ज्ञानयोगखण्डे द्वितीयोऽध्यायः॥२॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सू॰हि॰ २ विदितब्रह्मस्याभिप्रायः॥ शिवोवर्णाश्रमधर्मान्प्रपंचयति॥ तत्रब्रह्मचर्यपूर्वकत्वादाश्रमान्त
राणां तद्धर्मान्नेवप्रथममाह॥ अथात इति॥ यतोब्रह्मचर्यं प्रथमं आश्रमः॥ अतोब्रह्मस्य
तेजिज्ञासानंतरं तद्धर्मान्संप्रवक्ष्यामि॥ आम्नायैकेति॥ अष्टवर्षे ब्राह्मणमुपनयीतेत्या

ईश्वर उवाच॥ अथातः संप्रवक्ष्यामि ब्रह्मचर्याश्रमं मुने॥ आम्नायैकसुसंसिद्धमा
दराच्छृणु सुव्रत॥१॥ उपनीतो द्विजो वेदानधीयीत समाहितः॥ दण्डयज्ञोपवी
तं च मेखलां च तथैव च॥२॥ कृष्णाजिनं च कार्पासं अभुक्तं वा वस्त्रमुत्तमम्॥
धारयेन्मंत्रतो द्विद्वान्स्वसूत्रोक्तेन वर्त्मना॥३॥

दिश्रुतेः॥१॥ उपनीतो द्विज इति॥२॥ अध्ययनस्य वृत्त्यर्थे तयाप्राप्तत्वेनाविधेयत्वादुपनीयतं
अध्यापयीतेत्यस्मिन्वाक्ये प्रयोजकव्यापारवाचिभ्यामुपनयनाध्यापनधातुभ्यां प्रयो
जकव्यापारलक्षणया उपगच्छेत्॥ सोधीयीतेति हि व्याख्यातं॥३॥ च

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वैल्वपालाशौ विकल्पितौ केशांतिकाविति केशगनामंतिकौ पुरुषः शिरःसंमितावित्यपेः।। कामं [illegible]मि
ति।। मदृमास्त्वर्यपोरप्युपलक्षणम्।।६।। समिद्धाग्निसमुद्भवेनेति।। समिद्धोग्निः शिवाग्निस्तु

भिक्षाहारो यथाकामं गुरुशुश्रूषणोरतः।। धारयेद्बैल्वपालाशौ दण्डौ केशान्तिकौ
द्विजः।।४।। अथवा स्वयं वा ऋजुं सौम्यमव्रणं त्वग्विभूषितम्।। सायंप्रातरुपासीत संध्यावि
धुः समाहितः।।५।। कामं क्रोधं तथा लोभं मोहं चैव विवर्जयेत्।। अग्निकार्यं द्विजः कुर्यात्
सायंप्रातः स्वसूत्रतः।।६।।

स्येन भस्मना।। उक्तं हि चागमेषु।। शुद्धगोमयमादाय सद्योजातेन भस्मवित्।। पञ्चगव्यात्मकं
पिण्डं कृत्वा वामेन चांबुभिः।। शिवाग्निना दहेत् घोरं चालन्या चालयेत्तरम्।। स्मरन्नीशान

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सं॰हि॰ वे कुम्भे भस्म मूलेन संचयेत्॥ ततः किंचित्समुद्धृत्य जप्ताशस्त्रेण सप्तधा॥ क्रमशः शिरसः
१० कार्यं तेनाङ्गोद्घर्षणम्॥ ततस्त्वयावतास्नानं तावदुद्धृत्य मंत्रयेत्॥ कलाभिर्भस्मगायत्र्या

देवान्ऋषीन्पितॄन्स्नात्वा तर्पयेद्ब्राह्मणो नमः॥ समिद्धाग्निसमुत्थेन विरजानलजे
न वा॥७॥ अग्निहोत्रसमुत्थेन भस्मना सजलेन च॥ अग्निरित्यादिभिर्मंत्रैः षड्भि
र्वा सप्तभिः क्रमात्॥८॥ विमृज्याङ्गानि संस्पृश्य समुद्धृत्य ततः परम्॥ तिर्यक्त्रि
पुण्ड्रं उरसा ललाटेन करादितः॥९॥

ब्रह्माङ्गेष्वथ शिवाणुना॥ ॐ सद्योजाताय विद्महे वामदेवाय धीमहि तन्नो घोरः प्रचोदया

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दिति॥ भस्मगायत्री॥ विरजानलेति॥ ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहेत्येते मंत्रे हुतोऽ

ग्नौ वायां च शुचिर्भूत्वा शिवं ध्यात्वा शिवां तथा॥ मेधावीत्यादि भिर्मंत्रैर्धारयेद्भस्मरागः स
दा॥१०॥ त्रियायुषं जमदग्नेरिति मंत्रेण वा द्विजः॥ महादेवार्चनं कुर्यात्पुष्पाद्यैः पत्रतोन्य
तः॥११॥ मातरं पितरं वृद्धं तथा ज्येष्ठं स्वकं गुरुम्॥ अध्यात्मज्ञानिनं नित्यं श्रद्धये वाऽभि
वादयेत्॥१२॥ असावहं भो नामास्मि सम्यक्प्रणतिपूर्वकम्॥ आयुष्मान्भव सौम्ये
ति वाच्यो विप्रोऽभिवादने॥१३॥ आकारश्चास्य नाम्नोंते वाच्यः पूर्वाक्षरः प्लुतः॥ व्यस्त
स्तपाणिना कार्यमुपसंग्रहणं गुरोः॥१४॥

ग्निर्विरजानलस्तदुत्थेन मेधावी भूयासं तेजस्वी भूयासमित्यादयो मंत्राः॥१०॥११॥१२॥१३॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सू॰ हि॰ १४।।१५।।१६।। अन्यतइति।। अन्यैरक्षतचंदनादिभिः।। अभिवादने कृते।। अभिवादिते अगुर्वादिभिः।।
११

सव्येनसव्यः स्प्रष्टव्योदक्षिणोनतुदक्षिणः।। लौकिकंवैदिकंचापितथाध्यात्मकमेवच।।१५।।
आददीतयतोज्ञानंतंपूर्वमभिवादयेत्।। मातापित्रोश्चवंश्यांश्चगुरुस्त्वंश्यान्गुणाधिका
न्।।१६।। अनुवर्जेतमनसावाचाकायेनसादरम्।। गुरुंदृष्ट्वासमुत्तिष्ठेन्नमस्कृत्वाकृ
तांजलिः।।१७।। तेनैवाभिहितःपश्चात्समासीतान्यभागतः।। सत्यमेववदेन्नित्य
मधीतंचनविस्मरेत्।।१८।।

आयुष्मान्भवसौम्यदेवदत्ता इत्यादिकमेण प्रत्यभिवादनंचकार्यमित्याह।। आयुष्मा
न्भवेति।।१७।। व्यत्यासमेवदर्शयति।।१८।।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

१९॥सद्येनेति॥विप्रेभ्यइतितदलाभेवर्णान्तरेषु॥२०॥भवत्पूर्वमित्यादि भवतिभिक्षांदेहीतिब्रा

नित्यंनैमित्तिकंकर्ममोक्षकामनयाथवा॥विध्युक्तमितिबुध्वावाशान्तोभूत्वासमा
चरेत्॥१९॥भिक्षामाहृत्यविप्रेभ्योऽलाभेवर्णान्तरेष्वपि॥निवेद्यगुरवेश्नीया
द्ब्रह्मचारीदिनेदिने॥२०॥भवत्पूर्वंचरेद्भैक्ष्यमुपनीतोद्विजस्तथा॥भवन्मध्यंतु
राजन्योवैश्यस्तुभवदुत्तरम्॥२१॥अभिशस्तेषुसर्वेषुभिक्षांनित्यंविवर्जयेत्॥
प्राङ्मुखोन्नानिभुञ्जीतसूर्याभिमुखएववा॥२२

सद्येनेति॥विप्रेभ्यइतितदलाभेवर्णान्तरेषु॥
ह्मणः॥भिक्षांभवतिदेहीतिक्षत्रियः॥भिक्षांदेहीभवतीतिवैश्यइत्यर्थः॥२१॥२२॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्राणायेति॥ प्राणायस्वाहाऽपानायस्वाहेत्यादयोमंत्राः॥ इतिश्रीस्कांदेमहापुराणेसूतसंहितायांज्ञान

प्रक्षाल्यचरणौहस्तौद्विराचम्यान्नमुग्भवेत्॥ प्राणायेत्यादिभिर्मंत्रैर्हुत्वाप्राणाहुतीर्द्विजः॥
२३॥ वेदाभ्यासैकनिष्ठःस्यान्नान्यमंत्ररतोभवेत्॥ एवमभ्यसतस्तस्यवैराग्यंजायतेयदि॥
२४॥ प्रयुंजेत्परमेसंहेमोक्षकामनयाद्विजः॥ नैष्ठिकोवागृहीवापीभवेत्कामोयथारुचिः
२५॥ इतिश्रीस्कांदेमहापुराणेसूतसंहितायांज्ञानयोगखंडेतृतीयोऽध्यायः॥३॥

योगखंडेतृतीयोऽध्यायः॥३॥ ब्रह्मचर्येधर्मान्संग्रहेणोक्त्वागृहस्थधर्मान्वक्तुंप्रतिजानी
ते॥ अथयात इति॥ यतश्चरितब्रह्मचर्यस्यैवविवाहः॥ यथाहुः॥ वेदानधीत्यवेदौवावेदंवापिय

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

थाक्रमम्॥ अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेदिति॥ अतस्तदनंतरं गृहस्थधर्मो
उच्यन्ते॥१॥ स्नात्वा समावर्त्तनं कृत्वा प्रवरादिविवर्जितइति॥ असमानार्षगोत्रजामिति स्मृतेः

ईश्वरउवाच॥ अथातः संप्रवक्ष्यामि गार्हस्थ्यं संग्रहेण ते॥ अधीत्य वेदान्विविधान्पू
र्वोक्तेनैव वर्त्मना॥१॥ आचार्याऽनुज्ञया युक्तः स्नात्वा गार्हस्थ्यमाविशेत्॥ अनुकूले कुले हे
गोत्रे प्रवरादिविवर्जिते॥२॥ सूत्रोक्तेनैव मार्गेण वरयेत्कुलजां स्त्रियम्॥ सर्वलक्षण
सम्पन्नां साध्वीमन्यां विवर्जयेत्॥३॥ ऋक्षसंज्ञां नदीसंज्ञां वृक्षसंज्ञां च वर्जयेत्॥ तयाधर्मं
चरेन्नित्यं सहितः संयतेन्द्रियः॥४॥
॥५॥ समंत्रकमिति अमोहमस्मि सा त्वमित्यादयो मंत्राः॥ आत्माधेमिति॥ नार्यमरांपुष्यति नो

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सू०हि० सखायं केवलाघो भवति केवलादीतिश्रुतेः ॥ नपचेदन्नमात्मन इतिस्मृतिश्च ॥ यात्रार्थं शरीरयात्रा
१३
ऋतुकालेऽङ्गनासेवां कुर्यान्सूत्रतः समंत्रकम् ॥ देवाग्न्यतिथिभैक्षार्थं पचेन्नैवात्मका
रणात् ॥ ४ ॥ आत्मार्थं यः पचेन्मोहान्नरकार्थं सजीवति ॥ धर्मार्थं जीवनं येषां स
तानार्थं च मैथुनम् ॥ ६ ॥ ते मुच्यंते हि संसाराज्ञान्येनारकिणः सदा ॥ याजनाध्या
पनाभ्यां च विशुद्धेभ्यः प्रतिग्रहात् ॥ ७ ॥ यात्रार्थमर्जयेदर्थं यागार्थं वा द्विजोत्त
माः ॥ निर्जने निर्भये देशे विण्मूत्रादि विसर्जयेत् ॥ ८ ॥ प्रक्षालयेद्गुदं शिश्नं पा
दद्वंद्वं करद्वयम् ॥ मृज्जलाभ्यां यथाशक्ति गंधलेपनिवृत्तये ॥ ९
र्थम् ॥ ८ ॥ दयां सर्वेषु भूतेष्विति ॥ यतो गृहस्थाश्रमः सर्वेषामुपजीव्यः स्मर्यते हि गृह

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्याश्रममुद्दिश्य अथ यमात्मा सर्वेषां भूतानां लोकः स यज्जुहोति यद्यजते तेन देवानां लो

यावन्मात्रं मनःशुद्धिस्तावच्छौचं विधीयते॥ पश्चादाचमनं कुर्याद्दन्तकाष्ठं च भक्ष
येत्॥१०॥ द्विराचम्य पुनः स्नात्वा कृत्यशेषं समाचरेत्॥ प्राणायामत्रयं कुर्यात्सा
वित्रीं च जपेद्बुधः॥११॥ उपस्थानं ततः कुर्यान्मध्याह्नेप्येवमाचरेत्॥ ब्रह्मयज्ञं
द्विजः कुर्याद्वेदपारायणोरतः॥१२॥ अन्यानि यानि कर्माणि नित्यं तानि समाच
रेत्॥ अग्निकार्यं द्विजः कुर्याद्बलिकर्मादिकं तथा॥१३॥ नित्यश्राद्धं तथा दानमशक्ता
नां च रक्षणम्॥ दयां सर्वेषु भूतेषु कुर्याद्गृहस्थमाश्रितः॥१४

कोऽथ यदनुब्रूते तेन ऋषीणां अथ यत्पितृभ्यो निपृणाति यत्प्रजामिच्छते तेन पितॄणां अथ य
न्मनुष्यान्वासयते यदेभ्योऽशनं ददाति तेन मनुष्याणां यदस्य गृहेषु श्वापदा वयांस्या पिपीलिकाभ्य
उपजीवन्ति तेन तेषां लोक इति॥१५॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सू॰हि॰ १५।।१६।।१७।।१८।। नचान्यथेति।। उपवीतरहितो नस्यादित्यर्थः।।१९।। सतारेण शिवेन सप्रण

यतिसंरक्षणंकुर्यादन्नपानादिभिः सदा।। यतिश्च ब्रह्मचारी च पक्वान्नस्वामिनावुभौ।।१५
तयोरन्नमदत्वातु भुक्त्वा चान्द्रायणंचरेत्।। यतिहस्ते जलं दद्याद्भैक्षं दद्यात्पुनर्जलम्
१६।। तद्भैक्षं मेरुणा तुल्यं तज्जलं सागरोपमम्।। एकवारं गृहीनित्यमश्नीयादुत्तमं
हितत्।।१७।। द्विवारं वाक्षमोऽश्नीयात्त्वह्नानिशग्रासमात्रकम्।। कुकुटाण्डप्रमाणेन नतद्
ध्वोन विषदवान्।।१८।। होमेजपे च भक्तौ च गुरुवृद्धाद्युपासने।। तथैवाचमनेयज्ञोप
वीतिस्यान्नचान्यथा।।१९।। वैणवींधारयेत्तयष्टिंसोदकंचकमण्डलुम्।। उद्धूलनंसकृत्कु
र्यात्सर्वदेवोक्तवर्त्मना।।२०।। त्र्यैयंबकेन मंत्रेण सतारेण शिवेन च।। त्रिपुण्ड्रंधारये
न्नित्यंगृहस्थाश्रममाश्रितः।।२१।।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वेनपञ्चाक्षरेण॥२१॥२२॥२३॥रुद्राक्षारणमितिश्रुतिरिति स्मृत्यनुमितश्रुतिरित्यर्थः॥२४॥२५॥२६॥
निष्कामस्यजिज्ञासाजनकयज्ञादयइत्युक्तं सकामस्यस्वर्गादिकं जनयंतीत्याह॥स्वर्गकामइति॥

तेनाऽधीतंश्रुतंतेनतेनसर्वमनुष्ठितम्॥येनविप्रेणशिरसित्रिपुण्ड्रंभस्मनाधृतम्॥
२२॥त्रिपुण्ड्रंधारयेद्भक्त्यामनसापिनलंघयेत्॥श्रुत्याविधीयतेयस्मात्तत्त्यागीप
तितोभवेत्॥२३॥रुद्राक्षंधारयेन्नित्यंरुद्राक्षारणमितिश्रुतिः॥लिङ्गंसमर्चयेन्नि
त्यंदेवदेवंमहेश्वरम्॥२४॥उपाग्नीनाधायविधिवत्कुर्याद्यज्ञाननन्तरम्॥यज्ञैःस
र्वाणिपापानिविनश्यन्तिनसंशयः॥२५॥बुद्धीरणाशेषपापस्यशुद्धान्तःकरणस्यतु॥देव
देवपरिज्ञानेवांछाजायेतसुव्रत॥२६॥स्वर्गकामोयदिस्वर्गंयातियज्ञात्द्विजोत्तमाः॥
यदिस्वर्गकामस्तर्हियज्ञात्स्वर्गंयातीति॥स्वर्गकामोयजेत॥यज्ञेनविविदिषंतीतिश्रुतिद्वयादियं
व्यवस्था॥२७॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सं०हि० गृहाश्रमात् संन्यसेदितिच ब्रह्मचर्यं समाप्य गृही भवेत्॥ गृहाद्वनी भूत्वा प्रव्रजेत्॥ यदि वेतरथा ब्र
१५

पुत्रमुत्पादयेत्स्वस्यां पितृणामनृणशांतये॥२७॥ सत्यं ब्रूयात्प्रियं ब्रूयात्सर्वभूते
षु सर्वदा॥ एवं समाचरन्विप्रो विरक्तश्चेत् गृहाश्रमात्॥२८॥ संन्यसेत्सर्वकर्मा
णि वेदान्ताभ्यासयत्नवान्॥ वेदान्तश्रवणाभावे पतितोयं भवेद्ध्रुवम्॥२९॥ विरक्तोपि
मुमुक्षुश्चेद्धंसे वा संन्यसेद्गृही॥ बहूदके वाशक्तश्चेन्न्यसेद्द्विप्रः कुटीचके॥३०॥

ह्मचर्यादेव प्रव्रजेत् गृहाद्वा वनाद्वेति॥२५॥२६॥ विरक्तोपि मुमुक्षुश्चेत्परमहंसो भवेत्॥ अमुमुक्षु
रपि शक्तश्चेद्धंसो बहूदको वा भवेत्॥ अशक्तश्चेत् कुटीचको भवेदित्यर्थः॥३०॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अविरक्तो गृही ति॥ अतो गार्हस्थ्याद्वानप्रस्थाश्रममाश्रयेदित्यर्थः॥ यावदायुष्यं वा सम्यक् गार्ह
स्थ्यमाचरेत्॥३१॥ गार्हस्थ्यस्य प्राशस्त्ये हेतुः॥ गृहस्थादाश्रमा इति॥ यत आश्रमान्तराणां सर्वेषां

अविरक्तो गृही चान्ते वानप्रस्थं समाश्रयेत्॥ अथवा यावदायुष्यं गार्हस्थ्यं सम्यगा
चरेत्॥३१॥ गृहस्थादाश्रमाः सर्वे समुत्पन्ना सुरर्षिताः॥ तस्माद्गृहस्थ एव स्याद
विरक्तो द्विजः सदा॥३२॥ इति श्रीस्कांदे महापुराणे सूतसंहितायां ज्ञानयोगख
ण्डे चतुर्थोऽध्यायः॥४॥

स्वरूपलाभः॥ स्वधर्मपरिपालनं च गृहस्थाश्रमनिबंधनमतः स प्रशस्त इत्यर्थः॥३२॥ इति श्री
स्कांदे महापुराणे सूतसंहितायां चतुर्थोऽध्यायः॥४॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सं॰हि॰ ब्रह्मचर्यादुत्तमं गार्हस्थ्यमभिधाय ततोप्युत्तमं वानप्रस्थाश्रमं वानप्रस्थाश्रमं च वक्तुं प्रतिजा
१६ नीते ॥ अथात इति ॥ यतो गृहस्थादुत्तमो वनस्थः ॥ यदाहुः ॥ ब्रह्मचारी गृहस्थश्च वानप्रस्थोऽ
थ भिक्षुकः ॥ चत्वार आश्रमाः प्रोक्ता यो यः पश्चात्स उत्तम इति ॥ अतो गृहस्थधर्माभिधानानं

ईश्वर उवाच ॥ अथातः संप्रवक्ष्यामि वानप्रस्थाश्रमं मुने ॥ पुत्रे भार्यां विनिक्षिप्य गृ
हीत्वा वा समाहितः ॥१॥ शुक्लपक्षे शुभे वारे शुभनक्षत्रसंयुते ॥ सुमुहूर्ते वनं
गच्छेद्गृहस्थश्चानरण्यने ॥२॥ यमादिसहितः शुद्धस्तपः कुर्यात्समाहितः ॥ शाक
मूलफलाशी स्यानेनेशं पूजयेद्बुधः ॥३॥

नरम् ॥ वानप्रस्थधर्माभिधानमित्यर्थः ॥ तेनेशमिति तपः प्रभृति कं हि वनस्थस्य स्वधर्मः स्वध
र्मानुष्ठानमेव चेश्वरस्य पूजनं स्वकर्मणा तमभ्यर्च्य सिद्धिं विंदति मानव इत्युक्तम् ॥३

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

षोडशेति॥ यतआह॥ अष्टौ ग्रासा मुनेः प्रोक्ताः षोडशारण्यवासिनः॥ द्वात्रिंशत्तु गृहस्थानां यथे
ष्टं ब्रह्मचारिणामिति॥ पञ्चयज्ञानिति श्रूयते॥ पञ्च वा एते महायज्ञाः॥ देवयज्ञः पितृयज्ञो
भूतयज्ञो मनुष्ययज्ञो ब्रह्मयज्ञ इति॥ यदग्नौ जुहोत्यपि समिधं तद्देवयज्ञः॥ संतिष्ठते य

ग्रामादाहृत्य वाश्नीयाद्ग्रासान्षोडश बुद्धिमान्॥ जटाश्च बिभृयान्नित्यं नखलोमा
नि नोत्सृजेत्॥४॥ वेदाभ्यासं सदा कुर्यात् वाग्यतः सुसमाहितः॥ अग्निहोत्रं च जुहुया
त्पंच यज्ञान्समाचरेत्॥५॥

त्पितृभ्यः स्वधा करोत्यप्यपस्तत्पितृयज्ञः॥ संतिष्ठते यद्भूतेभ्यो बलिं हरन्ति तद्भूतयज्ञः॥ संति
ष्ठते यद्ब्राह्मणेभ्योऽन्नं ददाति तन्मनुष्ययज्ञः॥ संतिष्ठते यत्स्वाध्यायमधीयीतैकामप्यृचं य

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ज्ञः सामवानदूलयज्ञः संतिष्ठत इति॥ भौमानीति॥ शशकादीनि वनजानीति॥ वनं जलं जलजानि
कच्छपादीनि पञ्चपञ्चनखा भक्ष्याः गोधाकच्छप शल्यकाः॥ शशश्च नकुलश्चेति ग्रहस्य
स्याभ्यनुज्ञातान्यपि॥ तथा मधुमाक्षिकं च वनस्थेन वर्जनीयमित्यर्थः॥ कृच्छ्रचान्द्राय

चीरवासा भवेत्कुर्यात्स्नानं त्रिषवणं बुधः॥ सर्वभूतानुकंपी स्यात्प्रतिग्रह
विवर्जितः॥६॥ वर्जयेन्मधुमांसानि भौमानि वनजानि च॥ एकवारं सम
श्नीयाद्रात्रौ ध्यानपरो भवेत्॥७॥ जितेन्द्रियो जितक्रोधो भवेदध्यात्मचि
न्तकः॥ भूमौ शयीत सततं सावित्रीं च जपेद्बुधः॥८॥

रात्रिमिति॥ कृच्छ्रलक्षणानि मनुनोक्तानि॥ त्र्यहं प्रातः त्र्यहं सायं त्र्यहमद्यादयाचितम्॥ त्र्यहं प
रं तु नाश्नीयात्प्राजापत्यं चरन्द्विज इति॥ एकभक्तादिषु ग्राससंख्या प्रायसंवेनोक्ताः॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सायंद्वाविंशतिर्ग्रासाःप्रातःषड्विंशतिस्स्मृताः॥चतुर्विंशतिराचार्याःपरंनिरशनंस्मृतमिति
॥तत्स्वाराममचितेनैवोक्तम्॥कुक्कुटांडप्रमाणेनयथास्यास्यंविशेत्सुखमिति॥ [illegible]चा
न्द्रायणंपञ्चविधम्॥पिपीलिकामध्यंयवमध्यंऋषिचांद्रायणं॥शिशुचान्द्रायणं
यतिचान्द्रायणंचेति॥पिपीलिकामध्यमाहवसिष्ठः॥मासस्यकृष्णपक्षादौग्रासान्
द्याच्चतुर्दश॥ग्रासापचयभोजीसन्पक्षशेषंसमापयेत्॥तथैवशुक्लपक्षादौ
ग्रासंभुञ्जीतचापरम्॥ग्रासोपचयभोजीसन्पक्षशेषंसमापयेदिति॥यदाह
यमः॥एकैकंह्रासयेत्पिण्डंकृष्णेशुक्लेचवर्द्धयेत्॥एतत्पिपीलिकामध्यंचांद्रा
यणमुदाहृतम्॥वर्द्धयेत्पिण्डमेकैकंशुक्लेकृष्णेचह्रासयेत्॥एतच्चान्द्रायणंना
मयवमध्यंप्रकीर्त्तितम्॥त्रीन्त्रीन्पिण्डान्समश्नीयान्नियतात्माद्दृढव्रतः॥हविष्या

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्मृ०हि० त्रस्य वै मासं कृच्छ्रचान्द्रायणं स्मृतम्॥ चतुरः प्रातरश्नीयाच्चतुरः सायमेव वा॥ पिण्डाने तद्धि
१८ बालानां शिशुचान्द्रायणं स्मृतम्॥ पिण्डानष्टौ समश्नीयात् मासं मध्यंदिने रवौ॥ यतिचा

क्रोधपैशून्यनिद्रादिदूरतः परिवर्जयेत्॥ कृच्छ्रचान्द्रायणं कुर्यान्मासि मासि
वनस्थितः॥ ९॥ ग्रीष्मे पञ्चतपाश्च स्याद्वर्षास्वभ्रावकाशगः॥ आर्द्रवासा
स्तु हेमन्ते क्रमशो वर्द्धयंस्तपः॥ १०॥

न्द्रायणं ह्येतत्सर्वकल्मषनाशनमिति॥ ९॥ पञ्चतपा इति॥ पञ्चतपांसि तापकानि दिक्
चतुष्टये अग्नयः उपरि आदित्यश्चेति यस्य सर्वं च तथा॥ अभ्रावकाशग इति॥ अभ्रदर्श
नवान् अवकाशो अभ्रावकाशः गृहबाह्यश्वत्थादिकस्तं गत इत्यर्थः॥ १०॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

उपस्पृश्य॥ स्नात्वा उपपूर्वं स्पृशिः स्नाने प्रयुज्यते॥ त्रिषवणमुदकोपस्पर्शी चतुर्थकालमानभ
क्तः स्यादित्यादौ वायुभक्षः पवनाहारः॥ तदशक्तौ पयः प्रभृति शक्त्यनुसारेण कुर्यादित्यर्थः

उपस्पृश्य त्रिषवणं पितृदेवांश्च तर्पयेत्॥ एकपादेन तिष्ठेत वायुभक्षो ऽब्दमध्य
मे॥११॥ पयः पिबेच्छुक्लपक्षे कृष्णपक्षे च गोमयः॥ जीर्णपर्णाशनो वा स्यात्
कृच्छ्रैर्वा वर्तयेत्सदा॥१२॥ योगाभ्यासपरो भूत्वा ध्यायेत् पशुपतिं शिवम्॥
कृष्णाजिनी सोत्तरीयः शुक्लयज्ञोपवीतवान्॥१३

स्मर्यते हि मूलं फलं पयः आपो वायुराकाश इति॥ उत्तरमुत्तरं ज्याय इति॥ अब्दमध्यमे
एकस्याब्दस्य संवत्सरस्य मध्ये सदा वायुमेव भक्षयन्नित्यर्थः॥११॥१२॥१३॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्मृ॰हि॰ अधुनाचतुर्थाश्रममाह॥ अथवाग्नीति॥ आत्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेद्गृहादि
१२९ ति॥ अनग्निरनिकेतः स्याद्दशमोशरणो मुनिरिति॥ अथापसंवोव्याह॥ १४ हंसस्येति॥ अ

अथवाग्नीन् समारोप्य स्वात्मनि ध्याननतत्परः॥ अनग्निरनिकेतः स्यान्मुनिर्मोक्षपरो भवेत्॥१४॥ सदोपनिषदभ्यासपरो वा स्यात्समाहितः॥ त्रिपुण्ड्रोद्धूलनं कुर्याद्धंसस्योक्तमंत्रतः॥१५॥ यदा वैराग्यमुत्पन्नं तदैव प्रव्रजेद्दूनी॥ बहूदके वा हंसे वा मुमुक्षुः परहंसके॥१६॥

हंसस्य यदुक्तं संध्यवकमंत्रः स प्रणवः पञ्चाक्षरश्चतेनेत्यर्थः॥१५॥ यदेति॥ एषा च प्रव्रज्या सत्येव वैराग्ये कार्या बहूदके वेति वचनात्॥ प्राक्तनी कुटीचकविषया॥१६॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कुटीचकवहूदकादि चातुर्विध्यंच वक्ष्यमाणं तत्तर्द्धोनुष्ठानसामर्थ्यानुसारेणाव्यवस्थया
विकल्प्यते॥१७॥ संग्रहरूपेणेति॥ संन्यासभेदानामुद्देशमात्रमत्रवनस्थेनानुष्ठेयम्॥

सर्वं संग्रहरूपेण संप्रयुक्तं वृहस्पते॥ तस्मात्सर्वंप्रयत्नेन श्रद्धया विद्धि सुव्रत
॥२७॥ इति श्रीस्कांदे महापुराणे सूतसंहितायां ज्ञानयोगखण्डे पञ्चमोऽध्या
यः॥५॥

त्र

तथा वनस्थधर्मोध्याये कथितं संन्यासधर्मे पंचस्तु अनंतराध्याये वक्ष्यते॥ इति श्रीसूतसंहि
ताव्याख्यायां ज्ञानयोगखण्डे पंचमोऽध्यायः॥५॥ वनस्थप्रसंगेनोद्दिष्टमेव कुटीचकादि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्० हि० चतुष्टयं तद्धर्मोभिधानाय पुनरनुवदति ॥ अथात इति ॥ अत उक्तमाश्रमत्रयं धर्मस्कंधः सांसारि
२० कफलविषय एव ॥ श्रूयते हि त्रयो धर्मस्कंधा यज्ञोध्ययनं दानमिति प्रथमस्तप एव द्वितीयो

ईश्वर उवाच ॥ अथातः संप्रवक्ष्यामि संन्यासं मुनिसत्तम ॥ चतुर्विधास्तु विज्ञेया भि
क्षवो हन्ति भेदतः ॥ १ ॥

ब्रह्मचार्याचार्यकुलवासी तृतीयोत्यंतमात्मानमाचार्यकुले अवसादयन् सर्व एते पुण्यलोका भवंतीति ॥ अतस्ततो विरक्तस्यानंतरमपुनरावृत्तिरूपब्रह्मत्वप्राप्तये ज्ञानस्कंधः संन्यास उच्यते ॥ १ ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्रूयते हि ।। ब्रह्मसंस्थोमृतत्वमेतीति ।। ब्रह्मणि संस्था समाप्तिः निष्ठा यस्य चतुर्थाश्रमिणः स ब्रह्म
संस्थः स एवामृतत्वमपवर्गं प्राप्नोति ।। आश्रमांतराणामपि ब्रह्मसंस्थात्वसंभवं प्रायश्चप
रिहृतं हि तत्त्वविद्भिः लोककाम्याश्रमी ब्रह्मनिष्ठामर्हति वा न वा यथावकाशं ब्रह्मैव ज्ञातुम

कुटीचको मुनिश्रेष्ठस्तथैव च बहूदकः ।। हंसः परमहंसश्च तेषां वृत्तिं वदामि ते ।।२।।
कुटीचकश्च संन्यस्य स्वे स्वे वेश्मनि नित्यशः ।। भिक्षामादाय भुंजीत स्वबंधूनां
गृहेऽथवा ।।३।। शिखी यज्ञोपवीती स्यात्त्रिदंडी सकमंडलुः ।। स पवित्रश्च काषायी
गायत्रीं च जपेत्सदा ।।४।।

हेत्यवारणात् ।। अनन्यचित्तता ब्रह्मनिष्ठा सो कर्मठे कथं ।। कर्मत्यागी ततो ब्रह्मनिष्ठामर्हति

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सू०हि० नेतरइति॥ विहननं चैतन्नैरेव त्रयो धर्मस्कंधा इत्यत्राश्रमानधिकृत्य सर्वएते पुण्यलोका भवं
२१ तीति आश्रमकर्मानुष्ठायिनां पुण्यलोकमभिधाय ब्रह्मसंस्थोमृतत्वमेतीति मोक्षसाधन
त्वेन ब्रह्मनिष्ठा प्रतिपाद्यते॥ सेयं ब्रह्मनिष्ठा पुण्यलोककामिन आश्रमिणोपि संभाव्यते॥

सर्वाङ्गोद्धूलनं कुर्यात्त्रिपुण्ड्रं च त्रिसंधिषु॥ शिवलिङ्गार्चनं कुर्यात्स्वश्रद्धयैव दिने दि
ने॥४॥ बहूदकस्त्र संन्यस्य त्वं धुपुत्रादिवर्जितः॥ सप्तागारं चरेद्भैक्षमेकान्नं परिव
र्जयेत्॥६॥

आश्रम म[illegible] कर्माण्यनुष्ठाय यथावकाशं ब्रह्मनिष्ठायाः कर्त्तुं सुकरत्वात् नहि लोकका
मी ब्रह्म न जानीयादिति निषेधोस्ति॥ तस्मादस्ति सर्वस्याश्रमिणो ब्रह्मनिष्ठेति प्राप्ते

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ब्रूमः॥ ब्रह्मनिष्ठानाम सर्वव्यापारपरित्यागेन अनन्यचित्ततया ब्रह्मणि परिसमाप्तिः॥
न चासौ कर्मशूरे संभवति कर्मानुष्ठानत्यागयोः परस्पर विरोधात्तस्मात्कर्मत्यागि

गोवालरज्जसंबद्धं त्रिदण्डं शिक्यमद्भुतम्॥ पात्रं जलपवित्रं च कौपीनं च कम
ण्डलम्॥७॥ आच्छादनं तथा कंथां पादुके छत्रमद्भुतम्॥ पवित्रमजिनं सूचीं
पक्षिणीमक्षसूत्रकम्॥८॥ योगपट्टं बहिर्वस्त्रं मृत्खनित्रीं कृपाणिकाम्॥ स
र्वांगोद्धूलनं तद्वत् त्रिपुण्ड्रं चैव धारयेत्॥९॥ शिखी यज्ञोपवीती च देवताराध
नेरतः॥ स्वाध्यायी सर्ववेदानां वाचमुत्सृज्य ध्यानतत्परः॥१०॥

न एव ब्रह्मनिष्ठेति वृत्तिभेदात् इत्याचारभेदात्॥२॥ तत्र कुटीचकस्य वृत्तिमाह॥ कुटीचक
श्चेति॥३॥ बहूदकस्य वृत्तिमाह॥ बहूदकश्चेति॥६॥ जलपवित्रं जलशोधनवस्त्रं॥७॥ मृ

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

सं० हि० खनित्रीमिति॥ स खन्यते यया स्नानाद्यर्थं तां कृपाणिकां कृपाणाकारतीक्ष्णाग्रलोहघटितां
२२ यष्टिं स्वाध्यायीइति॥ स्वाध्याय एवोत्सृज्यमानो वाचमित्यापस्तम्बः॥१०॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri